CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

६५०   आत्मबोध प्रकरण   नं   १-३१ ग्रं. सं. ६५०   २६२

आ० १

॥श्रीगणेशायनमः॥ शतमखपूजितपादं शतयथमनसोप्यगोचराकारं॥ विकशितजल
रुहनेत्रमुमाछायांकमाश्रयेशंभुं॥१॥ इहभगवान्शंकराचार्यउत्तमाधिकारिणांप्रस्था
नत्रयेछांदोग्योपनिषद्बृहदारण्योपनिषत्शारीरिकभाष्यवेदांतप्रस्थानत्रयंनिर्माय
तदवलोकनासमर्थानांमंदबुद्धीनामनुग्रहार्थंसर्ववेदांतसिद्धांतसंग्रहमात्मबोधा
ख्यंप्रकरणंनिर्दिदृक्षिषुःप्रतिजानीते॥ छ॥ तपोभिःक्षीणपापानांशांतानांवीतरा
गिणां॥ मुमुक्षूणामपेक्ष्योयमात्मबोधोविधीयते॥२॥ कृच्छ्रचांद्रायणनित्यनैमित्तिका
द्यनुष्ठानरूपैस्तपोभिःक्षीणानिपापानिरागाद्यंतःकरणदोषास्तेषांनित्यनैमित्तिके
रेवकुर्वाणोदुरितक्षयमितिवचनात्॥ अतएवशांतानांअक्षोभिताशयानांवीतरागिणां
इहामुत्रार्थफलभोगरहितानांमुमुक्षूणांसंसारबंधनिर्हरणेकृतप्रयत्नानांयथोक्तसा
धनसंपन्नानांअयमात्मबोधोविधीयतेविधिमुखेनावश्यकतयाप्रतिपाद्यतइत्यर्थः
॥ननुतपोयोगमंत्रयागादिनेकसाधनेषुसत्सुमोक्षंप्रतिबोधएवकिमितिप्राधान्येन राम

१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

लोभश्चेदगुणेन किं पिसुनता जद्यस्त किं पातकैः सत्यं चेत्तपसा च किं शुचि मनो जद्यस्तती
र्थेन किं सौजन्या जदि किं गुणैः स्वमहिमा जद्यस्त किं मंडनैः सद्विद्या च धनेन किं अपजसः
जद्यस्त किं मृत्युना १ आराधितो जदि हरिस्तपसा ततः किं नाराधितो जदि हरिस्तपसा
ततः किं अंतर्बहिर्जदि हरिस्तपसा ततः किं नांतर्बहिर्जदि हरिस्तपसा ततः किं २
आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालोपि
न ज्ञायते दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्रमादमदिराम्उ
न्मत्तभूतं जगत् ३ किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः स्वर्गग्रामकुटीनि
वासफलदैः कर्मक्रियाविभ्रमैः मुक्त्वैकं भवदुःखभाररचना विध्वंसकालानलं स्वात्मानं
दपदप्रवेशकलनं शेषाः वणिग्वृत्तय ४ वरं सराव हस्तस्य चांडालागारवीथिषु भिक्षा
र्थिमटनं रामं नमोरषं हहयजीवितं १ जन्मभूमिर्न देशो हि तत्त्वज्ञो नास्ति स्वजनपादपः स्वफलैः
सीतलः छायो न तत्र दीवसं वसेत् २

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

२

नोचातइत्यत्राह॥ वोधोन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनं॥ पाकस्य वह्निवज्ज्ञानं
विनामोक्षोनसिध्यति॥२॥ तयो मंत्रकर्म्मयोगादिसाधनानि परंपरया क्रमेण ज्ञानद्वारा मो
क्षंसाधयंति॥ ज्ञानंतुजन्ममात्रादेवाज्ञानं निःशेषंनाशयित्वा मुमुक्षुस्वरूपेभिषेचयति।
॥अतोन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तं तदेव दृष्टांतेन हृदयन्निपाकस्येति। यथ्या लोके
पचनक्रियायाः काष्ठजलभांडादिसाधनेषु सत्स्वपि वह्निं विना पाको न सिध्यति। तद्वज्ज्ञा
नं विनामोक्षो न सिध्यतीत्यर्थः॥ ननु कर्म्मणां विचित्रशक्तिमत्वात्कर्म्मैव किंचिदज्ञानंना
शयिष्यति॥ किमात्मज्ञानेनेत्याशंक्य कर्म्माज्ञानयोर्विरोधाभावात् नैवमित्याह॥२॥ अवि
रोधितया कर्म्म नाविद्यां विनिवर्त्तयेत्। विद्याविद्यां निहंत्येव तेजस्तिमिरसंघवत्॥३॥
कर्म्मणो विद्याविरोधाभावादज्ञानं नाशयितुं नोत्सहते विद्याया विकाशरूपत्वात्। अंधत
मस्तेजःपुंजइव नाशयितुं समर्थेत्यर्थः॥ ननु प्रतिशरीरमात्मा परिच्छिन्न एवोपलभ्य
तेकथमस्य कैवल्यमित्यत्राह॥४॥ परिच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः॥ स्वयं

अ॰
२

प्रकाशतेह्यात्मामेघापायेंशुमानिव॥७॥ परिपूर्णस्याद्वितीयस्यात्मनअज्ञानपरिक
ल्पितोयावच्छरीराद्यासक्तः तपरिच्छिन्नत्वमविवेककृतमेवनतुतत्वतस्तद्दृष्ट्या अतो
विवेकेनविवेकज्ञानात्मात्माकेवलएवप्रकाशतेमेघावरणाभावेभानुवदित्यर्थः॥ नन्वा
त्मनोद्वैतसिद्धिरयुक्ताज्ञानेननद्वैतसिद्धिरित्यत्राह॥८॥ अज्ञानकलुषंजीवंज्ञानाभ्या
साद्विनिर्मलं। कृत्वाज्ञानंस्वयंनश्येज्जलंकतकरेणुवत्॥९॥ अज्ञानकार्यभूतैरहमादि
भिःकलुषीकृतंकर्तृत्वभोक्तृत्वाद्यभिमानिनंजीवंज्ञानकर्तुश्चिरंकालाभ्यासाद्ज्ञानहन
नद्वारातत्कार्यात्तत्करणादिकंनिःशेषंनाशयित्वास्वयमेवनश्यतिअज्ञानकार्यत्वात्॥
वृत्तेस्तत्रप्रतिबिंबितज्ञानमात्माभासहितत्वात्॥ आत्मन्येवैकीभवतितज्ज्ञानीमद्वयरावा
त्माप्रकाशतेयथाकतकरेणुराविलंजलंनिर्मलंकृत्वास्वयमेवनश्यतितद्वदित्यर्थः।
आपरोक्षतयानुभूयमानस्यसंसारस्यकथमसत्त्वमित्यत्रप्रत्यक्षविरुद्धमित्याशंक्यस्व
प्नदृष्टांतेनास्यमिथ्यात्वंसाधयति॥ संसारेति॥ संसारःस्वप्नतुल्योहिरागद्वेषादिसं

राम
२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

कुलः॥ स्वकालेसत्यवद्भाति प्रबोधेसत्यवद्भवेत्॥ ६॥ रागद्वेषादिभिः स्फुरन्नायमानः समा
रः स्वस्वकाले स्वस्वकारणाभूताज्ञानेसमनितावन्मिथ्या। भूतोपिसंसारः सन्निवाभाति। प्रबो
धेस। निवाक्यश्रवणाद्यात्मज्ञानोसतोभ्रसन्निवभवति। तत्रदृष्टांतः स्वप्नतल्पदिति॥ स्वप्नोहि
यावन्निद्रानुभूयते तावन्मिथ्याभूतोपिसत्यइवाभाति। प्रबोधेनिद्रानाशे मिथ्यात्वाद्विस
र्थः॥ जगन्मिथ्यात्वमेवदृष्टांतांतरेणद्रढयति॥ ७॥ तावत्सत्यंजगद्भातिशुक्तिकारजतंय
था॥ यावन्नज्ञायतेब्रह्मसर्वाधिष्ठानमद्वयं॥ ७॥ यथायावन्नीलपृष्ठत्रिकोणादिविशेष
ज्ञानंनोत्पद्यतेतावद्रजतज्ञानंसत्यमेवानुभूयतेतथासर्वाधिष्ठानभूतंसच्चिदानंदाद्वयंब्र
ह्मयावन्नज्ञायतेसाक्षात्नानुभूयतेतावज्जगदाकारेण परिणतः संसारः सत्यइवभात्याद्द
प्रपत इत्यर्थः॥ संवेदहंरूपप्रपंचजातंब्रह्मणोपवमायाकल्पितमितिप्रतिपादयति॥ ७॥ स
च्चिदात्मन्यनुस्यूते नित्येविष्णौप्रतिष्ठिताः॥ व्यक्तयोविविधाः सर्वाहाटकेकटकादि
वत्॥ सत्यज्ञानानंदात्मनिनित्येसर्वानिस्यूतेविष्णौव्या॥ पकेब्रह्मणिसर्वाद्देवति

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्त्रा०
३

र्यङ्गनरस्थावरजंगमात्मयो विविधा अपिव्यक्तयः सर्वोपाधैर्निर्भूते परमेश्वरे देहेन्द्रियकटक
मुकुटादयस्त्वकल्पिवाएवब्रह्मणअभिन्नाइत्यर्थः॥ उक्तमर्थमाकाशदृष्टांतेन द्रढयति॥
यथाकाशो हृषीकेशो नानोपाधिगतो विभुः॥ तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत्॥
९॥ हृषीकेशः मनःप्रभृतिसर्वेंद्रियप्रवर्त्तकः नियामकोवा विभुः सर्वगतः परमेश्वरः
स्वमायया परिकल्पितनानाविधोपाधिषु प्रतिविंवितः सन् नानेव भाति तन्नाशे सति
ब्रह्मात्मैकत्वज्ञानेन तेषां मायापरिकल्पितदेहाद्युपाधीनां नाशे सति केवलएकवद्भाव
ति। यथा एकएवाकाशो मठघटाद्युपाधिषु एकएव नानाविधो भवति उपाधिलयाद्देक
वद्भातितद्वदित्यर्थः॥ ९॥ ननु सर्वदेहेषु तत्तज्जात्यादिभिरनुविद्धस्य कथं नित्यमुक्तता
उच्यते तत्राह॥ नानोपाधिवशादेव जातिवर्णाश्रमादयः॥ आत्मन्यारोपितास्तोये रसवर्ण
दिभेदवत्॥ १०॥ पूर्वोक्तनानोपाधिवशादेवात्मनि जातिवर्णाश्रमादयः॥ आरोपितामा
याकल्पिताः ननु स्वतः। यथा स्वभावमाधुर्य्यं जलं कटुतिक्तमधुराम्लरक्तपीतादिद्रव्यो

राम
३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पेतं सत्तद्रूपं भवति। नतु स्वरूपेणात द्रित्यर्थः॥ छ॥ आत्मनोविद्यापरिकल्पितोपाधित्रय
मध्ये स्थूलोपाधिमाह॥ पंचीकृतमहाभूतसंभवं कर्मसंचितं॥ शरीरं सुखदुःखानां भोगाय
तनमुच्यते॥ १४॥ पंचानां भूतानां प्रत्येकं द्विधा विभज्य तत्रैकमेकमर्द्धं चतुर्द्धा विभज्य
स्वांशं परित्यज्य नेषु योजनं पंचीकरणं। एवं पंचीकृतेभ्यः स्थूलपृथिव्यादिभूतेभ्यः सं
भवो यस्य प्रारब्धकर्मभिः संचितं रचितं स्थूलशरीरं सुखदुःखानामायतनं भोगस्था
नं प्रसगात्मम इति। सूक्ष्मोपाधिमाह॥ पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं॥ अपंची
कृतभूतोत्थं सूक्ष्मांगं भोगसाधनं॥ १५॥ पंचप्राणाः एक एव महाप्राणस्य प्राणादयोवृ
त्तयः॥ ज्ञानेंद्रियकर्मेंद्रियभेदेन दशेंद्रियाणि दृशमनः शब्देन संकल्पविकल्पात्मांतःकर
णं बुद्धिशब्देन निश्चयात्मिका एतैः संयुक्तं॥ अपंचीकृतभूतोत्थं सूक्ष्मभूतोत्थं ज्ञानं सू
क्ष्मांगं लिंगशरीरं सुखदुःखभोगसाधनमित्यर्थः॥ छ॥ तृतीयं कारणोपाधिमाह॥ अ
नाद्यविद्यानिर्वा। च्याकारणोपाधिरुच्यते॥ उपाधित्रितयादन्यमात्मानमवधारयेत

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

आ॰
४

१३॥ सरहस्यमाम तिवीच्याअविद्यानादिभूताकारणोपाधिरूच्यते॥ सत्वसमष्टिव्यष्टिभेदेन
स्थूलसूक्ष्मप्रपंचयोः कारणभूतत्वात॥ कारणोपाधिरूच्यते उपाधित्रयकथने प्रयोज
नमाह॥ उपाधित्रितयादन्यमिति॥ तस्माद्विलक्षणमात्मानमवधारयज्ञानीयादित्यर्थः॥ ७
ननन्नमयाद्येषुकोशेषुव्याप्यतत्तन्मयततयास्थितस्य कुतोनित्यत्वमुच्यतइत्याशंक्याह॥
पंचकोशादियोगेनततन्मयइवस्थितः॥ शुद्धात्मानीलवस्त्रादियोगेनस्फटिकोपम॥
१६॥ अन्नमयप्राणमयमनोमयविज्ञानमयआनंदमयाः पंचकोशादिशब्देनाशन
पिपासादीनांग्रहणं॥ एतैर्योगेनमिथ्यातादात्म्येनतत्तन्मयइवस्थितः॥ आत्माशुद्धः॥
नतुतेषुवस्तुतोरंजितावेदोपि॥ सएषपुरुषोन्नरसमयइत्यादिभिः सूक्ष्मवस्तुदर्शनार्थ
मेवोपाधिस्थंवस्तुलक्ष्यविनतुतत्वदृष्ट्या॥ निर्मलस्फटिकोनीलपीतवस्त्रादियोगेन
तत्तन्मयइवाभाते॥ वस्तुतोनास्तितेनरंजनावदित्यर्थः॥ ७॥ असंगात्मस्वरूपज्ञान
विवेचनप्रकारमाह॥ वपुस्तुषादिभिः कोशैर्युक्तंयुक्त्यावघाततः आत्मानमंतरंशुद्धं एम
४

स

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विविच्यान्तं दुलं यथा ॥ १५ ॥ पंचकोशैरत्तावद्धात्म निष्ठितं वपुः स्थूलशरीरं तुषादिभि
र्युतं तं दुलमिव युक्त्या अवघाततः ॥ अवहननात् शुद्धमात्मानं तं दुलमिव विविच्या
त् ॥ विवेकेन ज्ञानीयात् कथमयं स्थूलदेहो नात्मा भूतकार्यत्वात् घटवत् सूक्ष्मदेहोपि
नात्मा देहत्वात् । स्थूलदेहवदिति अनुमानादिनानेभ्यः कोशेभ्यो भिन्नमात्मानं विविच्य ज्ञा
नीयादिति अर्थः ॥ छ ॥ नन्वात्मा सर्वगतस्तर्हि किं सर्वत्र सर्वे न दृश्यते इत्यत्राह ॥ छ ॥ स
दा सर्वगतोप्यात्मा न सर्वत्रावभासते । बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् ॥ १६ ॥
आत्मा सर्वगतोपि सर्वत्र व्याप्य स्थितोपि जडेषु देहादिषु प्रवृत्तौ हेतुर्न प्रकाश्यते ॥ रागादिभिर
हितायां बुद्धावेवावभासेत ॥ न सर्वत्र यथा प्रतिबिंबः स्वच्छेषु आदर्शादिषु दृश्यते नान्यत्र
तद्वदिति अर्थः ॥ छ ॥ देहे स्थितस्याप्यात्मनः शरीरादिभिन्नत्वं राजदृष्टांतेनाह ॥ देहेंद्रियमनोबुद्धिप्र
कृतिभ्यो विलक्षणं । तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १७ ॥ देहेंद्रियमनोबुद्धिप्रकृति
भ्यो जड परिणामिदृश्येभ्यो विलक्षणं शुद्धात्मानं । तद्वृत्तीनां साक्षितया स्थितं यथा रा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

आ० ५ गी

ज्ञास्वनगरेस्मिन्नेषु मंत्रिषु वर्त्तमानेषु स्वयं साक्षितयातान पश्यन्न तिष्ठति तद्वदेवज्ञानी
याहिस्यर्थः ॥ छ ॥ त्मनोंविकारित्वमयुक्तं सर्वदाव्यापारवान दृश्यते त्याह ॥ व्यापृतेष्विंद्रिये
ष्वात्माव्यापारीवाविवेकिनां ॥ दृश्यते भ्रेषु धावत्सु धावन्निव यथा शशी ॥ १८ ॥ इंद्रियादि
षु स्वस्वविषयेषु व्यावृतेषु सत्सु आत्माव्यापारीवाविवेकिनां गुहशाखाद्यकपरेसरन्निता
नांदृश्यते न तु तत्त्वदृशां यथा मेघखंडेषु वायुवशात् धावत्सु चंद्रोपि धावतीव लोकैर्दृ
श्यते न तु चंद्रमा धावति ॥ तथात्मापीसत्यर्थः ॥ छ ॥ ननु देहेंद्रियमनोबुद्धयोपि सचेतना
दृश्यंते किमात्मानमाश्रि सेवं वर्त्तंतेतत्राह ॥ आत्मा चैतन्यमाश्रित्य देहेंद्रियमनोधियः
स्वक्रियार्थेषु वर्त्तंते सूर्यालोकं यथा जनाः ॥ १९ ॥ निसज्ञानस्वरूपमात्म चैतन्यमा
श्रित्य देहेंद्रियमनोबुद्ध्यादयः स्वकार्यार्थेषु व्यवहरंति ॥ अतश्चेतनज्ञानमात्मन्येव
देहेंद्रियादिषु स्फुजडारावेन्यर्थः ॥ छ ॥ नन्वहं जातोस्मि बाल्यकौमाराद्यवस्थामनुभवा
मि पश्यामीत्याद्यनवरतमनुभूयमानस्यात्मनः कथमविकारित्वमुच्यत इत्यत्राह ॥ राम

आ॰
६

थंजाग्रत्स्वप्नयोर्द्वौ सन्त्यां प्रवर्त्तते सुषुप्तौ तस्याः बुद्धेर्नाशे कारणे लीनेन च प्रवर्त्तेते तत्
स्माद्बुद्धेरेव धर्माः न त्वात्मन इति॥ छ॥ नहि आत्मा कीदृक् स्वभाव इत्याशंक्य आत्मस्वभावं
उपदिशति॥ प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता॥ स्वभावः सच्चिदानंदनित्य
निर्मलतात्मनः॥२३॥ यथा प्रकाश एवार्कस्य स्वस्वभावस्तोये शैत्यमग्नेरुष्णता तथा
त्मनोपि सच्चिदानंदनित्यनिर्मलस्व[illegible]भावस्वरूपमित्यर्थः॥ छ॥ ननु यद्यप्यकारण
मात्मा तर्हि जानातीति प्रत्ययः कथमित्यपेक्षायामाह॥ आत्मनः सच्चिदंशश्च बुद्धेर्वृ
त्तिरिति द्वयं संयोज्य चाविवेकेन जानामीति प्रवर्त्तते॥२४॥ प्रत्यगात्मा तिसच्चि
दंशाः चश्च शावांशः आत्माभासः बुद्धेर्वृत्तिश्च एतत् द्वयमविवेकेन संयोज्या संगस्या
त्मनः केनापि संयोगो नास्त्येव तथापि अज्ञानवशात् मेलनं संभाव्य जानामीति प्रत्ययः
अहंकारवृत्तिः प्रवर्त्तते केवले प्रत्यगात्मनि न किंचिद्विकारोस्तीति भावः एतदेव
स्पष्टयति॥ छ॥ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति॥ जीवः सर्वमलं रम
६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ज्ञात्वाकर्त्ताहमस्मीति मुह्यति ॥२५॥ आत्मास्वभावात्सर्वविकारशून्यो बुद्धेः कदाचिद
पिबोधशंकैवनास्तितथापिजीवः साभासाहंकारः सर्वसाभासाअंतःकरणवृत्तीतां
एकत्रतस्यायःपिंडवह्निकेकत्रसंगतमेवमलमसमर्थज्ञात्वादेहेंद्रियाद्रिकमहमिति
विचार्यअहंकर्त्ताहंद्रष्टेति मुह्यतिभ्रांतोभवतीत्यर्थः॥ ७॥ आत्मस्वियमेवस्व
स्मिनविवेकेनान्यधर्मानारोप्यविभेतीसाह॥२६॥रज्जुसर्पवदात्मानंजीवोज्ञात्वाभयं
वहेत॥नाहंजीवःपरात्मेतिज्ञातश्चेन्निर्भयोभवेत॥२६॥यथांधकारादौविकाररहितर
ज्वादौसर्पादिरोपात्तत्वाभयकंपादिकंवहेत॥एवमात्मापिस्वस्मिनजीवत्वमारोप्यस
ंक्षितीयपरिच्छिन्नत्वालाभयदुःखसागरेमग्नोभवतियदाशास्त्राचार्यप्रसादेनसाक्षा
त्स्वानमुत्पन्नंभवति।नदाविवेकचक्षुषास्वात्मानमखंडानंदज्ञानैकरूपंसंपश्यन
ततोनाहंजीवःपरमात्माहमितिज्ञात्वाभयदुःखादिरहितःसुखीभवेत॥ ७॥नन्वा
त्मासंनसामीपकेर्तुर्धीमनोहंकारादिभिःकथंनावलोक्यतेनज्ञायतेतत्राह॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

आ०
७

आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि हि दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते॥ २७॥
आत्मा केवल एव संन्नपि बुद्धिमनोहंकारादीन्नवभासयति दृष्टांत॥ दृष्टांतमेन आदिनवभास्यते॥
यथा एक एव हि दीपो घटादीन्सर्वानपि प्रकाशयति प्रकाश्यते घटादिभिर्नावभास्यते तद्व
द्भिस्मर्थः॥ ७॥ आत्मा बुद्ध्यहंकारादिभिर्नावभास्यते इति दृष्टांतेनात्मज्ञाने ज्ञानांतरेणाप्य वि
तत्र मित्याशंकानेत्याह॥ स्वबोधेनान्यबोधेच्छा बोधरूपतयात्मनः न दीपस्यान्यदीपेच्छा
यथा स्वात्मप्रकाशने॥ २८॥ आत्मनो बोधरूपत्वात्मबोधे निसेसत्तित्स्वात्मनो बोधाय ज्ञा
नांतरापेक्षा नास्त्येव आनुभवस्वरूपत्वात् यथा दीपस्यैव स्वप्रकाशने दीपांतरापेक्षा ना
स्तितद्वदित्यर्थः॥ ७॥ यदि बुद्ध्यादिभिरात्माज्ञेयो न भवेत्तर्हि आत्मज्ञाने उपायांतरं केव्यं
स्तु उपायः क इत्यत आह॥ निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः विद्यादैक्यं महावाक्यै
र्जीवात्मपरमात्मनोः॥ २९॥ अथात आदेशो नेति नेतीत्यत्र निरसनवेदवाक्यैर्निखिलोपाधी
न्निषिध्यात्मानं ज्ञात्वा तत्त्वमसि अयमात्मा ब्रह्म तत्वो हं इत्यादिवाक्यैर्लक्षणया ब्राह्मात्मै॥ राम
७

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

काशानंविधातत्प्राक्रयात्।अन्नेनेनप्रकारेणज्ञातव्यमितिसर्प्पः॥२९॥आत्मस्वरूपज्ञानेअनात्मतिरसनं
भावेकानःक्लेशितिरित्याशंक्यअन्नात्मनिरसनाभावेआत्मज्ञानमेवमशक्यःयथानायंसर्प्पइत्यादेपि
तस्मायकेरज्ञानभावेरज्जुज्ञानंनोत्पद्यतेतद्वदनात्मनिरसनाभावेनात्मज्ञानतत्वमित्याशयवा
नाह॥आविद्यकंशरीरादिदृश्यंबुद्बुदवत्क्षरं।तद्विलक्षरं॥एतद्विलक्षणंविद्यादहंब्र
ह्मेतिनिर्मलं॥३०॥देहेन्द्रियादिसर्वदृश्यजातंआविद्यकदृश्यत्वात्।बुद्बुदवत्क्षरंनश्व
रं।एतद्विलक्षणंनिर्मलंनिरूपाधिकंनित्यमेकंसच्चिदानंदात्मकंब्रह्मैवाहमस्मीतिविद्यात्॥
ततत्कृत्यकृत्योभवतीत्यर्थः॥३०॥एवमुक्तेरित्यात्मानमद्वयानंदंज्ञात्वाकृतार्थ्यज्ञानेनापरोक्षत
याह्लादत्वात्स्वानुभवावष्टंभेनात्मन्येवात्मनामननप्रकारमाह॥देहान्यत्वान्नमेजन्मजरा
कार्श्यलयादयः॥शब्दादिविषयैःसंगोनिरिंद्रियतयानच॥३१॥पंचभिःश्लोकैःदेहान्य
त्वादित्रिःउद्दरूपत्वादिस्वभावः॥स्थूलशरीरादन्यत्वात्तनमेवृराकार्श्यलयादयोनसंति

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

इंद्रियादिभिरसंगत्वात्तारशब्दादिविषयभोगैः संगोनुभवोनास्त्येवार्थः॥ अमनस्त्वान्नमेदुः
खरागद्वेषभयादयः॥ अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥३२॥ एतस्माज्जायते
प्राणो मनः सर्वेंद्रियाणि च॥ खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी॥३३॥ कथ
मिंद्रियप्राणमनसामात्मसकाशात्संभवः स्फूर्तिः प्रमाणयति। स्पष्टार्थः॥ निर्गुणो निष्क्रि
यो नित्यो निर्विकल्पो निरंजनः॥ निर्विकारो निराकारो नित्यमुक्तोस्मि निर्मलः॥३४॥ गु
रुप्रसादात्स्वानुभवसिद्धमर्थं चाभिनयति॥ निर्गुण इत्यादिभिस्त्रिभिः श्लोकैः॥ अहं
निर्गुणः गुणाद्यभावान्निष्क्रियः इंद्रियाद्यभावान्नित्यः अपक्षयाभावान्निर्विकल्पः संक
ल्पविकल्पाभावात्। निरंजनः असंगत्वान्निर्विकारः षोडशकलात्मकलिंगदेहशून्यत्वा
त् निराकारः निरवयवत्वान्नित्यमुक्तः बंधाभावान्निर्मलः अविद्यातत्कार्यरहितत्वात्।
॥६॥ ननु पूर्वोक्तैर्हेतुभिरेव विशिष्टस्वरूपमन्वाशिष्टमिति सुक्ते तर्हि किं विशिष्टमित्यत्राह

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वाहा॥ अहमाकाशवत्सर्वंवहिरंतर्गतोच्युतः॥ सदासर्वसमःशुद्धोनिःसंगोनिर्मलोचलः॥३५॥
आकाशवत्सर्वदृश्यज्ञातस्य वहिरंतर्गतः अच्युतः च्युतिरहितः सदा सर्वसमः विषमेष्वपि समः
व्याप्यस्थितत्वात् शुद्धः निर्लेपः अचलः परिस्पचलनाभावात्॥ ७॥ नित्यशुद्धविमुक्तैकम
खंडानंदमद्वयं॥ सत्यंज्ञानमनंतंयत्परंब्रह्माहमेवतत्॥३६॥ एकमखंडानंदं द्विनीयाभावा
दद्वयं सत्यं ज्ञानमनंतं यत्परं ब्रह्मेति श्रुत्या प्रतिपाद्यते यत्परं ब्रह्मैवाहमस्मातिस्वरूपतत्त्वं कश्चि
त् पूर्वश्लोकोक्तमननं चिरंकालाभ्यस्तं सत्स्वरूपार्थं साधयतीत्याह॥ एवंनिरंतरं कृत्वा
ब्रह्मैवास्मीति वासनां॥ हरत्यविद्याविक्षेपान् रोगानिवरसायनं॥३७॥ एवमुक्तप्रका
रेण ब्रह्मैवाहमस्मीति निरंतरं प्र्येणचिरकालाभ्यस्तवासनाअविद्याकृतचित्तविक्षेपा
न् निःशेषतोनाशयति यथा रसायनं औषधं चिरकालसेवितं सत् रोगं निःशेषतो
नाशयति तद्वदित्यर्थः॥ ८॥ वृत्त्यानुसंधानेसाधनेनियममाह॥ विविक्तदेशआसीनो
विरागोविजितेंद्रियः भावयेदेकमात्मानं तमनंतमनन्यधीः॥ ३८॥ विविक्तदेशेजनसंवे

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

आ०
९

घवर्जितेदेशेआसीनःसुखोपविष्टःविरागःसर्वजगत्ताभिलाषः अतएवविनिर्जितानिइंद्रि
याणियेनसः अनंतपरिछिन्नमद्वयमेकमात्मानमनन्यधीः वृत्तस्यैवस्थितानिश्चया
त्मिकाबुद्धिर्यस्यतादृशोभावयेत्ध्यायेत्॥३९॥ इत्थंप्रपंचेजात्यंतिकध्वंसेएकत्वभावना
संभवइत्यतआह॥ आत्मन्येवाखिलंदृश्यंप्रविलाप्यधियासुधीःभावयेदेकमात्मा
नंनिर्मलाकाशवत्सदा॥३८॥ अखिलंदृश्यंजातंसुधीःशुद्धांतःकरणःसन्शुद्धया
धियाआत्मन्येवसमाधिसमयेप्रविलाप्यप्रकर्षेणनाशयित्वानंदाद्वितीयाभावादेक
मात्मानंसदाज्योत्स्नाकाशवत्भावयन्भवतिष्ठेत्॥ ॥ परमार्थदर्शीमुनिर्महत्
पर्वणादिकंसर्वंविहायपरिपूर्णज्ञानानंदस्वरूपेणैवावतिष्ठतइत्यतआह॥ ॥ रूपव
र्णादिकंसर्वंविहायपरमार्थवित्॥ परिपूर्णसच्चिदानंदरूपेणावतिष्ठति॥४०॥ अ
कस्यस्यघटार्थः॥ ननुप्रमात्रादित्रिपुटीज्ञानंवर्त्तमानमुपलभ्यतेकथमेकत्वभावने
त्याशंक्यपरमात्मनिभेदोनास्तीत्याह॥ ज्ञातृज्ञानज्ञेयभेदः परमात्मनिनविद्यते॥ परानंदैक

राम०
९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रूपत्वाद्दीव्यति स्वयमेव तत्॥ ४१॥ ज्ञातृज्ञानज्ञेयभेदः परमात्मनि न विद्यते॥ स भेदः कल्पि
तात्मन्येव भाति॥ ज्ञादेकरूपत्वात्॥ आत्मा स्वयमेव दीव्यति प्रकाशते॥ एवं विशुद्धवस्तुनो ध्यानतः
प्रत्यक्षफलमाह॥ एवमात्मारणौ ध्यानमथने सततं कृते॥ उदितावगतिर्ज्वाला सर्वाज्ञा
नेंधनं दहेत्॥ ४२॥ आत्मा अरणिः आत्मांतःकरणमेवारणिः तस्मिन्मनन एवोत्तरारणि
:ध्यानेन तयोर्मथने न सर्वदा कृते तत उदिता ज्वाला रूपावग॥ निःलीनविद्या अज्ञानमे
वेंधनं मूलाज्ञानं निःशेषतः सपरिवारं नाशयति॥ तदा मुमुक्षुः स्वाराज्येभिषिक्तः कृतकृ
त्यो भवतीत्यर्थः॥ ४२॥ जीवपरमात्मनोरत्यंतरैक्यज्ञानेनाविद्यापरिकल्पितं ध्यानमसि
निःशेषमथयाते सति परमात्मा स्वयमेवाविर्भवेदित्याह॥ अरुणेनेव बोधेन पूर्वं संत
मसि हते॥ तत आविर्भवेदात्मा स्वयमेवांशुमानिव॥ ४३॥ अरुणप्रकाशेन आदौ वं
धकाररूपे प्रमुमान्यथाविर्भवेत तद्वदात्मापीत्यर्थः॥ ४३॥ आत्मा सर्वदापरोक्षः स्व
भावत्वाद प्राप्त एव सन् आव्याकदाप्राप्तो भवेदिति शिष्याभिप्रायमाह॥ आत्मानुसंतते

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

३

आ० प्राप्तोप्यप्राप्तवदविद्यया ॥ तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा ॥ ४४ ॥ आत्मास
१० र्वत्र परिपूर्णानंदस्वरूपः सर्वदा प्राप्त एव अविद्यावशान्नित्याप्राप्त एवाभाति
तितन्नाशे तदावरणविद्यानाशे वाकाभ्रावरणात्प्राप्त एव भवति ॥ कंठगतचामीकरन्या
यादित्यर्थः ॥ ४४ ॥ ननु जीवपरमात्मन्येकत्वमयुक्तं प्रत्याशंक्याह ॥ स्थाणौ पुरुषव
द्भ्रांत्या कृता ब्रह्मणि जीवता ॥ जीवस्य तात्त्विके रूपे तस्मिन्दृष्टे निवर्त्तते ॥ ४५ ॥ अंधका
रे स्थिते स्थाणौ पुरुषोयमिति चोरशंकया विभ्रमितितत्प्रयोवा विचारणात् ॥ ब्रह्मणि जीव
त्वमारोप्यते तथाप्रा ॥ गुरूपदेशजनितविवेकदृष्ट्या तस्य जीवस्य तात्त्विके रूपे लक्ष्ये
तत्पदार्थैकदेशे ज्ञानकल्पितत्वात् जीवत्वमपि निवर्त्तते ब्रह्मैवाहमिति जानातीत्य
र्थः ॥ ४५ ॥ अहं ममेति प्रत्यये जायमाने कथं नाहमिति प्रत्ययदृत्याशंक्य तदपि तत्त्वैवमेव
त्याह ॥ तत्त्वस्वरूपानुभावादुत्पन्नं ज्ञानमंजसा ॥ अहं ममेति चाज्ञानं बाधते दिग्भ्रमा राम०
दिवत् ॥ ४६ ॥ जीवपरैकत्वादुत्पन्नं यज्ज्ञानं तदहं ममेति अज्ञानं बाधते दिग्भ्रमादिवद्धि १०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

वदितिभानुर्दर्शनादित्यर्थः॥छ॥ अहंममेतिप्रत्ययेनष्टेयोगीसम्यक्‌विवेकज्ञान
वान्सन्विज्ञानेनचक्षुषासर्वंदृश्यंप्रपंचंस्वात्मन्येवानुभवेनपश्यतीत्याह॥छ॥सम्य
ग्विज्ञानवान्योगस्वात्मन्येवाखिलंस्थितंएकंचसर्वमात्मानमीक्षतेज्ञानचक्षुषा॥४७॥
एकमात्मानंसर्वंपश्यतिकृतकृत्योभवतीतिभावः॥छ॥ नन्वात्मानंसर्वंपश्यतीतिप्रत्यक्ष
विरोधात्नानात्वेनदृश्यमानमिदंसकलमात्मन्यभेदेनपश्यतीत्यत्राह॥ आत्मैवेदं
जगत्सर्वमात्मनोन्यन्नविद्यते॥मृदोयद्वद्घटादीनिस्वात्मानंसर्वमीक्षते॥४८॥इदंस
र्वंजगदात्मैवात्मकार्यत्वाद्यतोन्यदात्मनोनकिंचिद्विद्यते॥ यथाघटशरावादिकंमृ
त्कार्यंमृदोन्यन्नास्तिअतःस्वात्मन्येवंघते॥ यथाघटशरावादिकंमृत्कार्यंमृदोन्य
न्नादात्मनोनकिंचिद्विद्यते॥ यथाघटशरावादिकंमृत्कार्यंमृदोन्यन्नास्तिअतःस्वा
त्मन्येवदृश्यजातमभेदेनेक्षतिपश्यति॥वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवमि
तिश्रुतेः॥छ॥ एवंभूतावस्थैषाजीवन्मुक्तिरित्याह॥ जीवन्मुक्तस्तुतद्विद्वान्पूर्वो

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

४

श्रा०
११

पाधिगुणांस्त्यजेत्॥सच्चिदानंदरूपत्वाम्देवेभ्रमरकीटवत्॥४९॥अनाद्यविद्यापरि
कल्पितपूर्वोपाधिदेहमनोबुध्यादीनगुणान्नसत्वादीन्परित्यजेदितिइदमेवजीवन्मुक्तिरि
त्युच्यते।सच्चिदादिगुणत्वाम्द्रमरकीटवत्साक्षाद्ब्रह्मभवेत्स्वाप्नोतीत्यर्थः॥छ॥तत्वतस्तु
आत्मारामः सुखं तिष्ठतीत्याह॥तीर्त्वामोहार्णवंहत्वारागद्वेषादिराक्षसान्॥योगीशां
तिसमायुक्तआत्मारामोविराजते॥५०॥मोहरूपार्णवमापूर्प्यंतत्वातंज्ञानतत्मवेन
तीर्त्वानिःशेषंनाशयित्वारागद्वेषादयएवराक्षसामोक्षपरिपंथिनस्तान्निःशेषतो
नाशयित्वाशांतिसमायुक्तःशमदमादिसहितआत्मारामआत्मन्येवक्रीडायस्यस
विराजतेस्वाराज्येनाभिषिक्तःप्रकाशते।अत्रार्थंतिरंध्वन्यते॥श्रीरामाख्योसविराजते
स्वाराज्येनाभिषिक्तःप्रकाशते।अत्रार्थंतिरंध्वन्यते॥श्रीरामाख्योरामःसमुद्रंती
र्त्वारावणादीनराक्षसान्हत्वासीतेवशांतिस्तयाशांत्यासमेतोविराजतेयोध्यायां॥छ॥ राम०
११

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

॥जीवन्मुक्तस्यलक्षणमाह॥वाह्यानित्यसुखासक्तिंहित्वात्मसुखनिर्वृतः॥घटस्थदीप
वत्स्वछंस्वंतरेवप्रकाशते॥ ५१॥वाह्येंद्रियविषयोत्थवानित्यसुखासक्तिंप्रीतिवास
नांहित्वात्तत्रहेतुरात्मसुखेननिर्वृतःघटस्थदीपवत्स्वछस्वांतरेवप्रकाशतेस्वसाक्षिक
मेवात्मानुभवसुखमित्तरेर्नाज्ञायतेतत्पर्थः॥ छ॥ एवमुक्तप्रकारेणजीवन्मुक्तःस
न्नपि।ध्वसंक्षयादेवनिवर्त्तितव्यमित्याह॥उपाधिस्थोपितद्धर्मैर्नलिप्तोव्योमवन्मु
निःसर्वविन्मूढवत्तिष्ठेदसक्तोवायुवच्चरेत॥ ५२ देहोपाधौसाक्षित्वेनस्थितोपिमु
निर्व्योमवत्तद्धर्मैर्नानुलिप्तोममकर्मलेपोनास्तीतिभावयेत।सर्वज्ञोपिमूढवत्साक्षि
तवत्तिष्ठेत।सर्वत्रविषयेषुयदृछयाप्राप्तेषुनासक्तोनासक्तिरहितःसन्वायुवच्चरेन्नि
र्गच्छेत॥प्रारब्धक्षयेदेहोपाधौलीनेविदेहकैवल्यमाह॥उपाधिविलयाद्विष्णौनिर्विशे
षंविशेन्मुनिः॥जलेजलंवियद्व्योम्नितेजस्तेजसिवयथा॥ ५३॥ उपाधिभूतदेहद्व
यविलयेप्रारब्धकर्मसंक्षयेमुनिर्योगीविष्णोसर्वत्रव्यापकेपरब्रह्मणिनिर्विशेषं

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

५

आ० मप्याभवतितत्प्याभवतितप्याविशेत॥ अत्रतं तैकोदृष्टांतः जलेजलमित्यादि ब्रुत्तगाः सर्वा
१२ तिशयत्वान्नरस्थलरूपो नाभिधम्मलोकद्वयं चा॥५३॥ यल्लाभान्नापरोलाभो यत्सुखान्ना
परंसुखं॥ यज्ज्ञानान्नापरंज्ञानं तद्ब्रह्मेत्यवधारयेत॥५४॥ यद्ब्रह्मसाक्षात्कारलाभादपरोला
भोनविद्यते सर्वलाभानां तत्रैवांतरभूतत्वात् यथाब्रह्मानंदलवानंदानामंतर्भावोय
त्सुखाद्ब्रह्मानुभवसुखादपरं सुखंनास्तिनिरतिशयत्वात॥ यज्ज्ञानाद्ब्रह्मसाक्षात्कारज्ञाना
दपरंज्ञानेनास्तिमोक्षहेतुत्वात्तद्ब्रह्मेतिजानीयात॥ यत्दृष्ट्वानापरंदृश्यंयभूत्वान
पुनर्भवः॥ यज्ज्ञात्वानापरंज्ञेयंतद्ब्रह्मेत्यवधारयेत॥५५॥ यद्दृष्ट्वानापरंमन्यद्दृश्यं
नास्तितेनैवपुरुषार्थसमर्थत्वात यद्भूत्वायेनैक्यंगत्वापुनर्भवोजन्मादिकंनास्ति
यज्ज्ञात्वायत्स्वरूपज्ञात्वान्यज्ज्ञेयंनास्तितद्देवब्रह्मेत्यवधारयेत॥ अन्यत्सर्वंहिप्यापांडि
त्यमित्यर्थः॥छ॥ तिर्यगूर्ध्वमधःसर्वंब्रह्मैवपरमित्याह॥ तिर्यगूर्ध्वमधःपूर्णंसच्चिदा राम०
१२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नंदमद्वयं॥ अनंतं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥ ५६॥ तिर्य्यगूर्द्ध्वमिति॥ स्पष्टार्थः॥ अ
तद्व्यावृत्तिरूपेणा वेदांते लक्ष्यते व्ययं॥ अखंडानंदमेकं यद्ब्रह्मेत्यवधारयेत्॥ ५७॥ अखं
डानंदमेकं ब्रह्म वेदांतैरतद्व्यावृत्तिरूपैरतरसने न ज्ञातव्यमित्याह॥ अतद्व्यावृत्तिरूपेणेति
स्पष्टार्थः॥ ननु ब्रह्मादयोपि निरतिशयानंदिन एवाश्रियंते तत्राह॥ अखंडानंदरूपस्य
तस्यानंदलवाश्रिताः॥ ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनो लवाः॥ ५८॥ अखंडानंदरूप
स्येति ब्रह्मेंद्रादयः रिछिन्नानंदिन एव ब्रह्मतु अखंडानंदानुभवानंदरूपत्वादपरिछि
न्नआनंदमेव स्वरूपं यस्य तस्यानंदसमुद्रस्यानंदलेशमाश्रित्य ब्रह्मेंद्रादयोप्यानं
दिनो भवंति आनंदतारतम्येन॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रु
ते परमप्रेमास्पदतयात्मैव भातीत्युच्यते॥ ५९॥ एतदयुक्तं अनात्मापि देहादिप्रपं
चः प्रियतरः अनुभूयतरत्वाशंक्याह॥ तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः॥ तस्मात्स
र्वगतं ब्रह्म क्षीरे सर्प्पिरिवाखिले॥ ६०॥ अखिलदेहाद्यनात्मावस्त्वपि तद्युक्तेनात्मना

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

आ०
१३

संयुक्तमेव प्रियतमं लोके कोपि व्यवहारस्तद्व ऋतरूप एव प्रियतरस्तस्मात्सर्वगतं ब्रह्मात्मतत्
प्रियं यथा क्षीरं सर्वं व्याप्य घृतमेवावतिष्ठते तस्मादेवस्त्वपि ब्रह्म व्याप्यत्वात्॥ प्रियमेवाभा
तिश्च तस्मात्तदेव प्रियतमम् इति सिद्धं॥ ५९॥ ननु आत्मा केन प्रकारेण सर्वं व्याप्नोतीती
ति जानीयादित्याशंक्य सत्त्वाद्वस्तुमप्राकृत्वादणुरेव स्थूलमिति श्रुतेः। सत्तारूपेण भाती
त्याह॥ अणुरण्वस्थूलमहस्वमदीर्घमजमव्ययं॥ अगुणं गुणावर्णं रूपं तद् ब्रह्मेत्यवधा
रयेत्॥ ६०॥ अणुरेव स्थूलमिति स्वार्थः॥ पुनस्तद्ब्रह्मज्ञानार्थे श्लोकत्रयेणाप्य
कृत्यपक्षे निरूपयति॥ यद्भावभास्यतेऽर्कादिर्भास्यैर्यत्तु न भास्यते। येन सर्वमिदं भा
ति तद्ब्रह्मेत्यवधारयेत्॥ ६१॥ यद्वस्तु भावादिभासमे तत्तु भास्यैरर्कादिभिर्न भास्यते। न
तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भांति कुतो यमग्निस्तमेव भांतमनुभा
ति सर्वं यस्य भासा सर्वमिदं विभातीति श्रुतेः। येन सर्वमिदं भूतभौतिकं भावरूपं जग राम०
द्भाति तद्ब्रह्मेति जानीयात्॥ ६२॥ तदाह यः पिंडवत्स्वयमेवान्तर्बहिर्व्याप्य भावयन्नखिलं ब्रह्म १३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वयमंतर्गतं व्याप्य भावयन्नखिलं जगत् ॥ ब्रह्म प्रकाशते वह्निप्रतप्तायस
पिंडवत् ॥

प्रकाशते वह्निप्रतप्तायसपिंडवत् ॥ ६१ ॥ स्वयमंतर्गतमिति स्पष्टार्थः ॥ ७ ॥ पुनस्तदेव
आह जगद्विलक्षणमिति सर्वं ब्रह्मैवसत्यं तथापि जगद्रूपेण प्रदर्श्यत इति तदाह ब्रह्मेति
॥ जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन्न किंचन ॥ ब्रह्मान्यद्भाति चेन्मिथ्या यथामरुमरीचि
का ॥ ६३ ॥ जगद्विलक्षणमपि न तत्कार्यत्वेन विचार्यमित्याह यत्तु प्राकं ब्रह्मणोन्यन्न विद्यते ॥
यदि ततोन्यदस्ति तर्हि किं चित्तन्मिथ्यैव मरुमरीचिका जलवदिति स्पष्टार्थः ॥ पुनस्तदेव ॥ स्फु
टं निरूपयति ॥ दृश्यते श्रूयते यद्यद्ब्रह्मणोन्यन्न किंचन तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदा
नंदमद्वयं ॥ ६४ ॥ चक्षुषा च दृश्यते श्रोत्रेण श्रूयते यन्मनसा स्मर्यते यच्च वाचा यद
भिधीयते तत्त्वज्ञानात्सर्वं ब्रह्म सच्चिदानंदमद्वयं ब्रह्मणोन्यन्न किंचिदस्तीति स्पष्टार्थः ॥ ७ ॥ स
र्वगतं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्ष्यते ॥ अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत् ॥
॥ ६५ ॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ज्ञानप्रसादेन विशुद्धसत्वः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ततस्तु तं पश्यति निष्कलं ध्यायमानमित्यादिश्रुतेः यदि सर्वगतं ब्रह्म तत्सर्वैः किं न दृश्य
ते इत्याशंक्य चक्षुरादिभिर्न गृह्यते इत्यनयाश्रुत्या प्रतिपादयति। न चक्षुषेति न चक्षु
षा न पश्यति कश्चनैनं हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवंति॥ य एतं
॥ ज्ञानचक्षुः सर्वगतमपि सच्चिदानंदं ब्रह्म पश्यति विश्वव्यापकमात्मानं सदपि भानुमंधो न
पश्यति॥ ज्ञानप्रसादेन चक्षुषा विशुद्धसत्वनिवृत्ताविद्यासदा सर्वत्र ब्रह्मैव पश्यतीत्य
र्थः॥ ६५॥ एवमुक्तरीत्यानुभवसंपन्नस्यापि तदाभासरहितस्य वासनावशात्किंचिदज्ञा
नं संभवति तत्परिहारार्थं पुनः श्रवणादि कुर्यादित्याह॥ श्रवणादिभिरुद्दीप्तो ज्ञानाग्नि
परितापितः॥ जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयं॥ ६६॥ जीवः प्रत्यगात्मा ए
तत्प्रकरणोक्तश्रवणमननादिभिरुद्दीप्तः प्रकाशितः ज्ञानमेवाग्निस्तेन परिता राम०
पितो भाति शोधितस्सन्॥ सर्वसंसारमूलभूताज्ञानमलान्मुक्तः स्वयमेव सम्यक् १४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

प्रकाशते यथाग्निनाप रितापितस्वर्णाश्रो याधिकंदुर्वर्णादिकं हित्वास्वरूपेण प्रकाश
तेतद्वदित्यर्थः॥५॥ एवं शोधितो जीवः परमात्माहृदयाकाशोउदितसन्तमः अज्ञानमुपसंह
रन्भानुवत्स्वं स्वरूपप्रकाशते इत्याह॥हृदाकाशोदितोह्यात्मा बोधभानुस्तमो यहृत्।
सर्वव्यापी सर्वधारी येमस र्वंप्रकाशते॥६॥ बोधएवभानुः सर्वस्याधारभूतत्वात्सर्वंत्मापी
सर्वधारी च शोभं स्पष्टं॥७॥ नन्वात्मनोह्यानप्रतिबंधकदुरितपरिहारार्थं प्रयागतीर्थयात्रा
द्योद्योगं कर्त्तव्यमित्याशंक्याह॥ आत्मतीर्थस्नातस्य न किंचित्कर्त्तव्यमित्याह॥ दिग्देशका
लाघनपेक्ष्यं सर्वगं शीतादिहृन्नित्यसुखं निरंजनं॥ यस्वात्मतीर्थं भजते विनिःक्रियः सस
र्ववित्सर्वगतोमृतोभवेत्॥६८॥ यो विनिःक्रियः परमंहंसः स्वात्मतीर्थं भजते स सर्ववि
त्सर्वज्ञः सर्वत्र परमात्मस्वरूपत्वात्। अमृतः मुक्तोभवेत्॥ कथंभूतं स्वात्मतीर्थं दिग्दे
शकालाघनपेक्ष्यमेव सर्वगं शीतादि द्वंद्वदुःखात्तिहरतीति शीतादिहृन्नित्यसुखं मोक्षा
नंदप्रापकत्वात्॥इतरतीर्थं तु तद्विपरीतं द्रष्टव्यं। तस्मादात्मतीर्थे स्नातस्य न किंचिदव

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

श्रा०
१५

शिष्य तेइतिभावः॥१॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्य्यगोविंदभगवत्पूज्यपादश्री
मच्छंकराचार्य्यविरचितात्मबोधप्रकरणसटीकंसंपूर्णं॥ सा व ण व दी। तेरस लखते
रूपदासपग्नातसैहजरामजोश्रीश्रीस्वामीनरायणदासजीकाप्रसादसु॥ ७॥ रामराम

पे. ~~५१~~ ५८
ग्रं. सं. ~~६~~ ६५०

राम०
१५

१६८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur